# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय २१

एवं सञ्चिन्त्य विप्रेन्द्रो जगाम लघुविक्रमः ।
आख्यातुं तद्यथावृत्तं यमस्य सदनं प्रति ॥ १॥

अपश्यत्स यमं तत्र देवमग्निपुरस्कृतम् ।
विधानमुपतिष्ठन्तं प्राणिनो यस्य यादृशम् ॥ २॥

स तु दृष्ट्वा यमः प्राप्तं महर्षिं तत्र नारदम् ।
अब्रवीत्सुखमासीनमर्घ्यमावेद्य धर्मतः ॥ ३॥

कच्चित्क्षेमं नु देवर्षे कच्चिद्धर्मो न नश्यति ।
किमागमनकृत्यं ते देवगन्धर्वसेवित ॥ ४॥

अब्रवीत्तु तदा वाक्यं नारदो भगवानृषिः ।
श्रूयतामभिधास्यामि विधानं च विधीयताम् ॥ ५॥

एष नाम्ना दशग्रीवः पितृराज निशाचरः ।
उपयाति वशं नेतुं विक्रमैस्त्वां सुदुर्जयम् ॥ ६॥

एतेन कारणेनाहं त्वरितोऽस्म्यागतः प्रभो ।
दण्डप्रहरणस्याद्य तव किं नु करिष्यति ॥ ७॥

एतस्मिन्नन्तरे दूरादंशुमन्तमिवोदितम् ।
ददृशे दिव्यमायान्तं विमानं तस्य रक्षसः ॥ ८॥

तं देशं प्रभया तस्य पुष्पकस्य महाबलः ।
कृत्वा वितिमिरं सर्वं समीपं समवर्तत ॥ ९॥

स त्वपश्यन्महाबाहुर्दशग्रीवस्ततस्ततः ।
प्राणिनः सुकृतं कर्म भुञ्जानांश्चैव दुष्कृतम् ॥ १०॥

ततस्तान्वध्यमानांस्तु कर्मभिर्दुष्कृतैः स्वकैः ।
रावणो मोचयामास विक्रमेण बलाद्बली ॥ ११॥

प्रेतेषु मुच्यमानेषु राक्षसेन बलीयसा ।
प्रेतगोपाः सुसंरब्धा राक्षसेन्द्रमभिद्रवन् ॥ १२॥

ते प्रासैः परिघैः शूलैर्मुद्गरैः शक्तितोमरैः ।
पुष्पकं समवर्षन्त शूराः शतसहस्रशः ॥ १३॥

तस्यासनानि प्रासादान्वेदिकास्तरणानि च ।
पुष्पकस्य बभञ्जुस्ते शीघ्रं मधुकरा इव ॥ १४॥

देवनिष्ठानभूतं तद्विमानं पुष्पकं मृधे ।
भज्यमानं तथैवासीदक्षयं ब्रह्मतेजसा ॥ १५॥

ततस्ते रावणामात्या यथाकामं यथाबलम् ।
अयुध्यन्त महावीर्याः स च राजा दशाननः ॥ १६॥

ते तु शोणितदिग्धाङ्गाः सर्वशस्त्रसमाहताः ।
अमात्या राक्षसेन्द्रस्य चक्रुरायोधनं महत् ॥ १७॥

अन्योन्यं च महाभागा जघ्नुः प्रहरणैर्युधि ।
यमस्य च महत्सैन्यं राक्षसस्य च मन्त्रिणः ॥ १८॥

अमात्यांस्तांस्तु सन्त्यज्य राक्षसस्य महौजसः ।
तमेव समधावन्त शूलवर्षैर्दशाननम् ॥ १९॥

ततः शोणितदिग्धाङ्गः प्रहारैर्जर्जरीकृतः ।
विमाने राक्षसश्रेष्ठः फुल्लाशोक इवाबभौ ॥ २०॥

स शूलानि गदाः प्रासाञ्शक्तितोमरसायकान् ।
मुसलानि शिलावृक्षान्मुमोचास्त्रबलाद्बली ॥ २१॥

तांस्तु सर्वान्समाक्षिप्य तदस्त्रमपहृत्य च ।
जघ्नुस्ते राक्षसं घोरमेकं शतसहस्रकः ॥ २२॥

परिवार्य च तं सर्वे शैलं मेघोत्करा इव ।
भिन्दिपालैश्च शूलैश्च निरुच्छ्वासमकारयन् ॥ २३॥

विमुक्तकवचः क्रुद्धो सिक्तः शोणितविस्रवैः ।
स पुष्पकं परित्यज्य पृथिव्यामवतिष्ठत ॥ २४॥

ततः स कार्मुकी बाणी पृथिव्यां राक्षसाधिपः ।
लब्धसंज्ञो मुहूर्तेन क्रुद्धस्तस्थौ यथान्तकः ॥ २५॥

ततः पाशुपतं दिव्यमस्त्रं सन्धाय कार्मुके ।

तिष्ठ तिष्ठेति तानुक्त्वा तच्चापं व्यपकर्षत ॥ २६॥

ज्वालामाली स तु शरः क्रव्यादानुगतो रणे ।
मुक्तो गुल्मान्द्रुमांश्चैव भस्मकृत्वा प्रधावति ॥ २७॥

ते तस्य तेजसा दग्धाः सैन्या वैवस्वतस्य तु ।
रणे तस्मिन्निपतिता दावदग्धा नगा इव ॥ २८॥

ततः स सचिवैः सार्धं राक्षसो भीमविक्रमः ।
ननाद सुमहानादं कम्पयन्निव मेदिनीम् ॥ २९॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com